G. Vishnumurty Bhatta

27
102

श्रीसांवाय नमः

श्रीकाशीनाथग्रंथमाला

एकोनत्रिंशपुष्पम्

नन्दिकेश्वरकारिका

नंदिकेश्वरप्रमथप्रणीता

उपमन्युमुनिविरचित

सूत्रविमर्शिन्याख्यव्याख्योपेता

नागनूरुवृहन्मठाध्यक्ष

पंडित श्रीकाशीनाथशास्त्रिकृतटिप्पणीसमलंकृता च

मैसूरु

श्रीपंचाचार्यविद्युन्मुद्रणालये मुद्रित

१९३६

6148

अ.व्याख्या (सं) - 11

जि. विष्णु मूर्ति: ॥

(76)

श्रीसांबाय नमः

श्रीकाशीनाथग्रंथमाला

एकोनत्रिंशपुष्पम्

नन्दिकेश्वरकारिका

नंदिकेश्वरप्रमथप्रणीता

उपमन्युमुनिविरचित

सूत्रविमर्शिन्याख्यव्याख्योपेता

नागनूरुबृहन्मठाध्यक्ष

पंडित श्रीकाशीनाथशास्त्रिकृतटिप्पणीसमलंकृता च

मैसूरु

श्रीपंचाचार्यविद्युन्मुद्रणालये मुद्रिता

१९३६

श्रीजगद्गुरुपंचाचार्याः प्रसीदंतु.

प्रस्तावना

श्री रामचन्द्र पाण्डेय महोदयेभ्यः
सहार्दं दत्तम्

अयि सहृदयाः !

सुप्रसिद्धं खलु शब्दशास्त्रं सदाशिवडमरुध्वानसमुद्भूतैः "अ-इ-उ-ण्" इत्यादिभिश्चतुर्दशभिः सूत्रैर्निबद्धमिति । पाणिनिपतंजल्यादिमुनयस्तु सूत्राण्येतानि केवलं शब्द शास्त्रस्य मूलभूतानीति मत्वा सूत्रभाष्यादिद्वारा शब्दशास्त्रं रचयामासुरिति प्रतीतिरेव सर्वत्र समुज्जृंभते. किन्तु सदा सदाशिवसन्निधिमलंकृत्य तन्मनोभावग्राही प्रमथाधिपतिः श्रीनंदिकेश्वरः शिवसूत्रचतुर्दशकस्यास्य मुमुक्षुजनमोक्ष सिद्धिरूपपरमप्रयोजनमेव मुख्योद्देश्यमित्याकलय्य सनक सनंदनसनत्कुमारव्याघ्रपाद वसिष्ठादिमहर्षिगणप्रार्थनानुसा रेण तेषामेतच्छिवसूत्रनिगूढं शिवतत्त्वं षड्विंशतिकारि काभिः समुपदिदेश। ता इमाः कारिकाः शक्तिविशिष्टपरब्रह्म स्वरूपं स्फुटं प्रकटयंत्यो मुमुक्षूणां मनो महानंदसिंधौ निमज्जयंति. ज्ञानिनामेतत्प्रमोदास्पदमेव. अस्तु ! गूढार्थ गर्भितानामेतासां कारिकाणां उपमन्युमहामुनिर्व्याख्यां

विलिख्य लोकोपकारं चकार। व्याख्यैषाऽपि दुरूहेति ज्ञात्वा श्रीनंदिकेश्वरस्याशयमवलंब्य मया टिप्पणी विरचिता । ग्रंथस्यास्य महत्त्वातिशयं मत्वा पंचाशद्वत्सरेभ्यः पूर्वं काशीक्षेत्रमलंकृतवन्तः श्रीकेशवदत्तशास्त्रिणो ग्रंथमसुं मुद्रितवंतः। पुरा मुद्रितग्रंथोऽयं सद्यः कुत्रापि न लभ्यते. तस्माद्ग्रंथरत्नमिदं जगतीतले कदापि विलोपि माऽभूदिति विभाव्य सटिप्पणं पुनर्मुद्रितम्। अतो ज्ञानिनो ग्रंथरत्नमिदं सम्यक् संवीक्ष्य संतुष्टचित्ता भवेयुरित्याशासे.

विद्वज्जनविधेयः,

काशीनाथशास्त्री.



नागनूरुबृहन्मठाध्यक्षाः पंडितवर्याः

श्रीकाशीनाथशास्त्रिणः

॥ श्रीशिवाय नमः ॥

नन्दिकेश्वरकारिका.

नृत्तावसाने नटराजराजो
ननाद ढक्कां नवपंचवारम् ।
उद्धर्तुकामः सनकादिसिद्धा
नेतद्विमर्शे शिवसूत्रजालम् ॥१॥

सूत्रविमर्शिनीव्याख्या

नमः शिवाय देवाय सर्वज्ञाय परात्मने ।
यस्योन्मेषनिमेषाभ्यां व्यक्ताव्यक्तमिदं जगत् ॥१॥

गुरुं शिवं कुमारं च शिवतत्त्वविशारदम् ।
प्रणम्य नन्दिकेशादीन् शिवभक्तान् मुहुर्मुहुः ॥२॥

कारिकामादिसूत्राणां नन्दिकेशकृतां शुभाम् ।
लोकोपकारिणीं दिव्यां व्याकरोमि यथामति ॥३॥

इह खलु सकललोकनायकः परमेश्वरः सनकसनन्दन सनत्कुमारादीन् श्रोतॄन् नन्दिकेशपतञ्जलिव्याघ्रपादवसिष्ठादीनुद्धर्तुकामो डमरुनिनादव्याजेन चतुर्दशसूत्रात्मकं तत्त्व

मुपदिदेश । तदनु सर्वे मुनीन्द्रवर्याश्चिरकालमाश्रितानाम स्माकं तत्त्वं चतुर्दशसूत्रात्मकमुपदिदेशेति मत्वा अस्य सूत्र जालस्य तत्त्वार्थं नन्दिकेश्वरो जानातीति नन्दिकेश्वरं प्रणि पत्य पृष्टवन्तः । ततस्तेषु पृष्टवत्सु स षड्विंशतिकारिका रूपेण तत्त्वं सूत्राणामुपदेष्टुमिच्छन्निदमाचचक्षे । (नृत्ताव साने इति) अहमिति शेषः । नटराजराज इत्यनेन मङ्गलानि दर्शितानि, स विश्वरूप विलासवैचित्र्यचमत्कारप्रवीणत्वान्नटराज राजः । स स्वात्मतत्त्वं वागाद्यगोचरमिति ज्ञापनार्थं ढक्का निनादव्याजेन सनकादीनुद्धर्तुकामः नवपञ्चवारं चतुर्दश वारं स्वान्तर्गतमात्मतत्त्वं प्रकटयितुं नृत्तावसाने ढक्कां ननाद नादितवान् । अहं विततनिनादोद्भूतवर्णात्मकमाद्यं महारहस्यमेतच्छिवसूत्रजालं सूत्रसमूहं विमर्शे स्फुटीकरो मीत्यर्थः ॥१॥

अत्र सर्वत्र [1]सूत्रेषु अंत्यवर्णचतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥२॥

अनुबन्धाः पाणिन्याद्युद्देश्यका एवेत्याह । अत्रेति— एष्वित्यादिरर्थः । अन्त्यं वर्णेति वा पाठः । उभयथापि बहु व्रीहिः। कदम्बमन्यपदार्थः। समासान्तः। चतुर्दशेति वा पाठः। तदा तत्पुरुषात् "ङ्येकयोः" इतिवच्चतुर्दशेति प्रयोगः ।

---

1 अइउण् इत्यादिषु हल् इत्यंतेषु चतुर्दशसूत्रेष्वित्यर्थः

धात्वर्थं [1]धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थमित्यर्थः। "अन्त्य वर्णजालं शब्द" इति न्यायात्। तथा चोक्तमिन्द्रेण। "अन्त्य वर्णसमुद्भूता धातवः परिकीर्तिताः।" इति ॥२॥

अइउण्

अकारो ब्रह्मरूपः स्यान्निर्गुणः[2] सर्ववस्तुषु।
[3]चित्कलामिं समाश्रित्य [4]जगद्रूप उणीश्वरः ॥३॥

तत्राद्येन सूत्रेण सर्ववर्णानां समस्तभुवनानां च समुद्भवरूपं स्वात्मतत्त्वमुपदिष्टं तदाह। अकारो ब्रह्मेति--अः परमेश्वरो निर्गुणः इं [5]मायामाश्रित्य उः व्यापकः सगुणः

---

1 सकलस्यापि शब्दशास्त्रस्य "अण्-इण्-उण्-अक्-अच्" इत्यादि चतुश्चत्वारिंशत्प्रत्याहारैकमूलत्वात्, प्रत्याहाराणां च "अइउण्" इत्यादि चतुर्दशसूत्रांत्यवर्णमूलत्वात् तदिदं चतुर्दशसूत्रघटितांत्यवर्णजालं धातुमूलकसकलशब्दशास्त्रमूलमिति भावः।

2 परब्रह्मणः सर्वदैव कल्याणगुणगणाकरत्वादत्र निर्दिष्टं निर्गुणपदं हेयगुणराहित्यपरम्।

3 चिच्छक्तिमित्यर्थः

4 विमर्शाख्या पराशक्तिर्विश्ववैचित्र्यकारिणी।
यस्मिन् प्रतिष्ठिता ब्रह्म तदिदं विश्वभाजनम्॥ (परि-२०)
पत्रशाखादिरूपेण यथा तिष्ठति पादपः।
तथा भूम्यादिरूपेण शिव एको विराजते॥ (परि-१०)
इति सिद्धांतशिखामणौ भगवता रेणुकाचार्येणायमेवाशयः स्फुटीकृतः।

5 ऊर्ध्वमायाम्

ईश्वरः ण् आसीत् इत्यर्थः। सर्ववस्तुषु परापश्यन्तीमध्यमा वैखर्यादिषु, इं चित्कलामित्यत्र 'गायत्रीमिंच' इतिवदीकारो बोध्यः। अत्र ईकारस्तु सूत्रे नोदितः इकार एव प्रकटितः। सर्गसंभवकाले अ, इ, उ, ऋ, ऌ, इति वर्णपञ्चकमेव सर्वेषा मेकोनपञ्चाशदक्षराणां भूतपञ्चकादिपञ्चवर्गाणां क्रमेण योनिरिति। 'असद्वा इदमग्र आसीत्ततो वै सदजायत' इति श्रुतिः। असद्ब्रह्म वै निश्चयेन अग्रे सृष्टेः पूर्वमिदमक्षरात्मक मासीत् ततोऽक्षरात् सगुणमजायत जातमित्यर्थः। तदुक्तं गीतायाम् 'अक्षराणामकारोऽस्मि' इति ॥३॥

अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः।
[1]आद्यमन्त्येन संयोगादहमित्येव जायते ॥४॥

अतएवाह। अकारइति—आदिरकारः अन्त्यः हकारः अकारादिहकारान्ता वर्णास्ततः परमात्मनः समभवन्नि त्यर्थः। परमः शिव इति पाठान्तरम् ॥४॥

---

1 आद्यवर्णेन अकारेण अन्त्यवर्णस्य हकारस्य संयोजनात् "अहम्" इति जायते. परशिवब्रह्म अहंपदवाच्यमिति भावः।

अकारः शिव आख्यातो हंकारः शक्तिरुच्यते।
शिवशक्तिमयं ब्रह्म स्थितमेकमहंपदे ॥ (परि-२०)

इति सिद्धांतशिखामणावयमेव भावः प्रदर्शितः।

[1]सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत् ।
ज्ञप्तेर्बभूव पश्यन्ती मध्यमा वाक् ततः स्मृता ॥५॥
वक्त्रे विशुद्धचक्राख्ये वैखरी सा मता ततः ।
सृष्ट्याविर्भावमासाद्य मध्यमावाक् समा मता ॥६॥

[2]ईश्वर एवानादिजीवोपाध्याश्रितकर्मप्रेरितप्राणव्यापारानन्तरं नाभौ पराख्यं [3]मायापरिणाममुपेत्य, हृदि पश्यन्त्या

---

1 सकलचराचरात्मकमिदं विश्वं सृष्टेः पूर्वं परावागात्मकचैतन्यस्वरूपमासीत्, चैतन्यस्वरूपा सा परावागेव क्रमेण पश्यन्ती-मध्यमा-वैखरीरूपेण परिणामं प्राप्य चराचरात्मकविश्वाकारेण विराजत इति भावः । परादिवाक्चतुष्टयमेतच्छक्तिपरिणामात्मकमिति बोध्यम् । परा-पश्यन्ती मध्यमाख्यं वाक्त्रयं शरीरांतर्निगूढं सत् बहिर्न प्रकाशते ; एतत्तु योगिनमिव गम्यम्. वैखरीवागपि वक्त्रादाविर्भूय स्पष्टोच्चाररूपा भवति ।

तां देवीं वाचं हविषा यजामहे । सा नो दधातु सुकृतस्य लोके ।
चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेंगयंति । तुरीयं वाचो मनुष्या वदंति ॥
(तैत्तिरीयब्राह्मणं २-८-८)

इत्यनेन मंत्रेण यजुःश्रुतिरपीममेवाभिप्रायं प्रकटीकरोति. । परब्रह्म अक्षरात्मकसकलशब्दराशिस्वरूपमिति भावः ।

2 अत्र ईश्वरपदं स्वापृथक्सिद्धशक्तिविशिष्टेश्वरपरम्.

आत्मशक्तिविकासेन शिवो विश्वात्मना स्थितः ।
कुटीभावाद्यथा भाति पटः स्वस्य प्रसारणात् ॥६६॥ (परि-१०)

इत्यनेन रेणुकभगवत्पादाचार्यैः सिद्धांताशिखामणावयमेवाशयः प्रदर्शितः ।

3 मायापरिणामं-शक्तिपरिणाममित्यर्थः ; अस्य सर्वत्रान्वयः ।

ख्यमुपेत्य, विशुद्धचक्रे मध्यमाख्यमुपेत्य, वक्त्रे वैखर्या ख्यमुपेत्य च वेदादिरूपो भवतीत्यर्थः। श्रुतिरपि "वागेव विश्वा भुवनानि जज्ञे" इति । सूक्ष्मावागेव विश्वाकारेण विपरिणमते इति बोध्यम्। श्रुत्यन्तरमपि। "वाचैव विश्वं बहुरूपं निबद्धं तयैवैकं प्रविभज्योपभुङ्क्ते" इति ॥५-६॥

[1]अकारं सन्निधीकृत्य जगतां कारणत्वतः ।
इकारः सर्ववर्णानां शक्तित्वात्कारणं मतम् ॥७॥

तत्र सर्वत्रेकारस्यैव स्वतन्त्रतामाह अकारमिति ॥७॥

जगत् स्रष्टुं प्रभोरिच्छा यदा ह्यासीत्तदाऽभवत् ।
[2]कामबीजमिति प्राहुर्मुनयो वेदपारगाः ॥८॥

[3]अकारो ज्ञप्तिमात्रं स्यादिकारश्चित्कला मता ।
उकारो विष्णुरित्याहुर्व्यापकत्वान्महेश्वरः ॥९॥

जगत् स्रष्टुमिति —उक्तञ्च "स्वप्रकाशपरमात्मवस्तुनो दृश्यमानजगतः सिसृक्षया । कामतः परशिवप्रकाशितं

---

1 इकारवाच्या शक्तिः अकारवाच्यं परब्रह्म अविनाभावसंबंधेन समाश्रित्य सकलचराचरप्रपंचस्य कारणं भवतीति भावः ।

2 परमात्मन इच्छामात्रसृष्टेः कामबीजमिति संज्ञा वर्तते ।

3 अकारः चैतन्यस्वरूपपरमात्मवाचकः, इकारः शक्तिवाचकः, उकारश्च व्यापकत्वधर्मवाचकः; एतदक्षरत्रयस्य तात्पर्यं–शक्तिविशिष्टः परमेश्वरः सकलचराचरप्रपंचव्यापक इति बोध्यम् । तृतीयश्लोकस्य व्याख्याने उपमन्युनाऽयमेवाशयः स्फुटीकृतः ।

कामबीजमिदमेव निश्चितम्॥" इति. "बीजबिन्दुद्वयारूढं सार्धयोनिस्वरूपकम्। महाकामकलारूपमात्मानं चिन्तयेत् प्रिये॥" इति च ॥८—९॥

ऋलृक्

ऋलृक् सर्वेश्वरो [1]मायां मनोवृत्तिमदर्शयत्।
तामेव [2]वृत्तिमाश्रित्य जगद्रूपमजीजनत् ॥१०॥
[3]वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते।
चन्द्रचन्द्रिकयोर्यद्वद्यथा वागर्थयोरपि ॥११॥
स्वेच्छया स्वस्य चिच्छक्तौ विश्वमुन्मीलयत्यसौ।
वर्णानां मध्यमं क्लीबमृलृवर्णद्वयं विदुः ॥१२॥

ननु सर्ववेदान्तेषु परमेश्वर एक इति निश्चितत्वात् मायामिं चित्कलां समाश्रित्य जगद्रूपोऽभूदित्युक्तेऽद्वैत हानिर्जायेतेत्याशङ्क्याह। ऋलृगिति—ऋ-परमेश्वरः, लृ-मायाख्यां मनोवृत्तिं, क्-अदर्शयत्। तामेवाश्रित्य स्वेच्छया जगज्जनयामासेत्यर्थः। "सोऽकामयत बहु स्यां प्रजायेय" इति श्रुतिः। श्रीतन्त्रेऽपि "मत्तो ह्यभून्मनोरूप लृकारः परमेश्वरि" इति। ऋ लृ वर्णौ यथा तादात्म्यमापन्नौ तथेत्यर्थः ॥१०-११-१२॥

---

1 मं-शिवं, अयति-स्वभावतः प्राप्नोतीति माया, परशिवब्रह्म निष्ठशक्तिरित्यर्थः। "मं शिवं परमं ब्रह्म प्राप्नोतीति स्वभावतः। मायेति

प्रोच्यते लोके ब्रह्मनिष्ठा सनातनी ॥" इति सिद्धांतागमे मायाशब्दनिर्वचनं स्फुटीकृतम् ।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ (४-१०)

इति श्वेताश्वतरेऽप्ययमेवाशयः प्रदर्शितः ।

[2] वृत्तिर्नाम परमेश्वरनिष्ठधर्मरूपशक्तिविशेषः, परमेश्वरः तादृश शक्तिविशेषविशिष्टः सन् सकलचराचरात्मकं जगज्जनयामास ।

तदीया परमा शक्तिः सच्चिदानंदलक्षणा ।
समस्तलोकनिर्माणसमवायिस्वरूपिणी ॥ (परि. २)

इतिसिद्धांतशिखामणावयमेवाशयः सूचितः ।

[3] धर्मधर्मिणोरभेदः स्वभावैकत्वात्, अतो धर्मधर्मिणोः क्रियानपि भेदो नास्ति. चंद्रस्य चंद्रिकायाः, वाचः अर्थस्य च यथा नित्य संबंधो वर्तते तथा शक्तिशक्तिमतोर्नित्यसंबंधो वर्तत इति बोध्यम् ।

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वंदे पार्वतीपरमेश्वरौ ॥

इति रघुवंशे कालिदासमहाकविना अमुमेवाशयमवलंब्य मंगलमाचरितम्।

शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः ।
शक्तिस्तु शक्तिमद्रूपाद्व्यतिरेकं न गच्छति ॥
तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव ।
शक्तिशक्तिमतोर्यस्मादभेदः सर्वदा स्थितः ॥

इति श्रीकंठभाष्ये (१-२-१) श्रीकंठशिवाचार्येण एतदाशयप्रतिपादक शिवागमवाक्यान्युदाहृतानि ।

यथा चंद्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी ।
तथा शक्तिर्विमर्शाख्या प्रकाशे ब्रम्हाणि स्थिरा ॥ (परि–२०)

इति सिद्धांतशिखामणावप्ययमेव भावः प्रदर्शितः श्रीरेणुकभगवत्पादैः ।

एओङ्

एओङ् मायेश्वरात्मैक्यविज्ञानं सर्ववस्तुषु ।
साक्षित्वात् सर्वभूतानां स एक इति निश्चितम्॥१३॥

ननु जनयामासेत्युक्ते जन्यजनकभावेऽद्वैतहानिः स्या दित्याशङ्क्य "तत् सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतिमाश्रित्याह एओङिति—जन्यजनकत्वं च स्वस्यैव तत्तद्रूपेण वर्तमानत्वादिति नाद्वैतहानिः । अकारोकारा भ्यां निष्पन्नप्रणवरूपेण ओकारेण सगुणनिर्गुणयोरैक्ये बोधिते तेनैव दृष्टान्तेन सर्वत्रैक्यबुद्धो द्वैतनिरासो ध्वनि तः । समष्टिव्यष्टिभेदेन पूर्ववर्णयुतद्वितीयस्य पूर्ववर्ण युततृतीयस्य च समन्वयबोधकमिदं सूत्रम् । अ—अक्षरा त्मकः इ—मायायुक्तःसन् यः, सः अ—उ प्रज्ञानस्वरूपः, प्रज्ञानात्मा । सर्ववस्तूनामेकत्वात् अद्वैतोपपत्तिः । न नानात्वं जन्यजनकत्वं च । स्वयं प्रविश्य तत्तद्रूपेण वर्तत इत्यर्थः । वटबीजन्यायेन च पूर्वसूत्रद्वयगतवर्णपञ्चकमेव सकल जगत्कारणमिति प्रागुक्तम् । उत्तरसूत्रवर्णानामपि तस्मादेव संभवः । अत्राप्यपरत्वे सर्ववेदसम्मतत्वम् । तथा च सनकदक्षिणामूर्त्तिसंवादे महावाक्यविवरणे—"शृणु त्वं सावधानेन चतुर्णां च समानतां । वेदानां च महाभाग चतुष्टयमिहोच्यते ॥ ब्रह्मशब्देन यद्वस्तु तत्प्रज्ञानमिती

रितम्। प्रज्ञानं ब्रह्म यस्माद्धि तस्माद्ब्रह्माऽस्म्यहं ततः ॥ तद्ब्रह्म सर्वसाक्षीति तत्त्वमस्येव तत्त्वतः । अन्यत्व वारणार्थायाऽयमात्मेत्यपि वर्ण्यते ॥ इति. ॥१३॥

ऐऔच्

ऐऔच् ब्रह्मस्वरूपःसन् जगत् स्वान्तर्गतं ततः।
इच्छया विस्तृतं कर्तुमाविरासीन्महामुनिः ॥१४॥

स्वात्मभूतस्य परमेश्वरस्य जगत्कारणत्वं कथमित्या शंक्याह ऐऔजिति—ततः स्वान्तर्गतं जगद्विस्तारयितु मिच्छुः ऐ ज्ञानादिशक्तियुक्त इति. अतः अकारस्य पूर्व सूत्रगतस्य एकारस्यच योगे ऐकारत्वमेकत्वं च। संप्र ज्ञानस्वरूपपरमेश्वरो यः स पूर्वसूत्रगत एव । अकारस्य पूर्वसूत्रगतस्य ओकारस्य च योगे औकारत्वं । यः संप्र ज्ञानात्मा मायाशबलितः स ऐकारो यः स आ ई आ ऊ इत्याविर्भावे उक्तः । उक्तं च स्वरविमर्शिन्याम्—"उकार ज्ञानसंयोगात्सर्वसंहतिरिष्यते" इति। इच्छया जगद्विस्तार यितुमुद्युक्त इत्यर्थः। अत्राह—"प्रणवेन जगद् व्याप्तं माया यामवतिष्ठते" इति ज्ञानोत्तमे । एवं तत्त्वसमुदायानां त्रयोदशवर्णेभ्यः [1]शिवादिप्रकृत्यन्तानामुद्भवः । प्रकृति

---

[1] शिव, शक्ति, सदाशिव, ईश्वर, शुद्धविद्या, माया, कला, विद्या, राग, काल, नियति, पुरुष, प्रकृत्याख्यानि त्रयोदश तत्वानि.

006148

पुरुषविवेक उत्तरत्र वक्ष्यते, अस्मिन् सूत्रे उपसंहारत्वेन पठितम् । अत्र ह्रस्वदीर्घप्रभेदात् चतुर्दशस्वराणामेव सङ्कीर्तनं चतुर्दशभुवनचतुर्दशचक्रचतुर्दशप्रकाराणामिति निष्कर्षः । तदुक्तं शिवगौरी संवादे महामन्त्रतत्त्वप्रकाशिन्याम्— "तव मंत्रोऽहमीशानि मम रूपं त्वमेव हि । चतुर्दशात्मकं चक्रं स्वरचक्रमितीरितम् ॥ त्रयोदशात्मकं तुर्यमावयोर्मन्त्रमम्बिके । [1]उच्छ्वनकाले विन्द्वात्मा तस्मा दक्षरसम्भवः ॥ बिन्दुस्फोटनमात्रेण वर्णानां च समुद्भवः । तस्माद्व्योमादिकं भूतपंचकं समजायत ॥ बिन्दुः श्रीचक्र राजस्य परब्रह्मात्मकस्त्विति । चतुर्दशात्मकः पश्चाच्चक्राकारेण सम्भवः । जातानि भुवनान्यत्र चतुर्दश चतुर्दश ॥" इति. ॥१४॥

हयवरट्

भूतपञ्चकमेतस्माद्धयवरण्महेश्वरात् ।
व्योमवाय्वम्बुवन्ह्याख्यभूतान्यासीत्स एवहि ॥१५॥

तत आत्मनः सकाशादाकाशादिभूतसम्भवमाह भूतपञ्चकमिति—स एवेति परमेश्वर एवेत्यर्थः ॥१५॥

---

1 जगत्सृष्टिसमये इत्यर्थः ।

हकाराद्व्योमसंज्ञं च यकाराद्वायुरुच्यते ।
रकाराद्वन्हिस्तोयं तु वकारादिति सैव वाक् ॥१६॥

हकारादिति— "तस्माद्वा एतस्मादात्मन आकाशः संजातः" इति श्रुतिः । तस्मात्परमेश्वराद्भूतपञ्चकमासीदित्युक्तम् ॥१६॥

लण्

आधारभूतं भूतानामन्नादीनां च कारणम् ।
अन्नाद्रेतस्ततो जीवः कारणत्वाल्लणीरितम् ॥१७॥

तत्राकाशादिभूतचतुष्टयमेवोक्तं न पृथिवीत्याकांक्षाया माहआधारेति— भूतानां प्राणिजातानामुद्भिज्जस्वेदजजरायुजाण्डजादीनां प्रधानाधारत्वादाधारभूता पृथिवी पुनश्चान्नपानादीनां कारणत्वात्प्रत्येकत्वेन लणित्युदीरितमित्यर्थः । "अन्नाद्रेतः" इति न्यायात् ॥१७॥

ञमङणनम्

शब्दस्पर्शौ रूपरसगन्धाश्च यमङणनम् ।
व्योमादीनां गुणा ह्येते जानीयात्सर्ववस्तुषु ॥१८॥

ततः पृथिव्यादीनां कारणत्वेन स्थितानां तन्मात्राणामुत्पत्तिक्रममाह । शब्देति ॥१८॥

झभञ्

वाक्पाणी च झभञ् आसीद्विराड्रूपच्चिदात्मनः ।
सर्वजन्तुषु विज्ञेयं स्थावरादौ न विद्यते ॥
वर्गाणां तुर्यवर्णा ये कर्मेन्द्रियमया हि ते ॥१९॥

ततः सूत्राभ्यां कर्मेन्द्रियवर्गमुपदिशति वाक्पाणी चेति—विराड्रूपस्य शिवस्य प्राणिजातस्य च झकार भकारौ स्थावरादिषु विना विराड्रूपं विज्ञेयमित्यर्थः ॥१९॥

घढधष्

घढधष् सर्वभूतानां पादपायू उपस्थकः ।
कर्मेन्द्रियगणा ह्येते जाता हि परमार्थतः ॥२०॥

अथ क्रमप्राप्तं पादादिकमाह घढधषिति—परमार्थतः परमशिवसकाशात् कर्मेन्द्रियगणाः पादपायूपस्था घढध वर्णा जाता इत्यर्थः ॥२०॥

जबगडदश्

श्रोत्रत्वङ्नयनघ्राणजिह्वा धींद्रियपंचकम् ।
सर्वेषामपि जंतूनामीरितं जबगडदश् ॥२१॥

अथ क्रमप्राप्तेन्द्रियसम्भवमाह श्रोत्रेति—"वर्गाणां मध्यवर्णोत्थो ज्ञानेन्द्रियगणः स्मृतः" इति वचनशासनाज्जव गडद्दवर्णसमूहो ज्ञानेन्द्रियाणां जनक इति ज्ञातव्यमित्यर्थः ॥२१॥

खफछठथचटतव्

प्राणादिपंचकं चैव मनो बुद्धिरहंकृतिः ।
बभूव कारणत्वेन खफछठथचटतव् ॥२२॥

ततः प्राणादिपञ्चकमनोबुद्ध्यहंकाराः समुन्मील्यन्ते प्राणादीति-स्पष्टम् ॥२२॥

वर्गद्वितीयवर्णोत्थाः प्राणाद्याः पंच वायवः ।
मध्यवर्गत्रयाज्जाता अंतःकरणवृत्तयः ॥२३॥

वर्गेति—एतैरष्टवर्णैः प्राणादिपंचकं मनोबुद्ध्यहंकृत यश्च जगतां कारणत्वेन संभूता इत्यर्थः ॥२३॥

कपय्

[1]प्रकृतिः पुरुषश्चैव सर्वेषामेव सम्मतौ ।
सम्भूताविति विज्ञेयं कपय् स्यादिति निश्चितम् ॥

ततः सर्वप्राणिकारणत्वेनाद्यन्तवर्गद्वयाद्यक्षरग्रहणेन सम्पुटीभावं प्रकृतिपुरुषाभ्यां प्रकाशयति प्रकृतिमिति ॥२४॥

---

1 आदितश्चतुर्विंशतिकारिकापर्यंतं शिवागमप्रसिद्धानि षट्त्रिंशत्तत्त्वानि प्रतिपादितानि.

शषसर्

सत्त्वं रजस्तम इति गुणानां त्रितयं पुरा ।
समाश्रित्य महादेवः शषसर् क्रीडति प्रभुः ॥२५॥

शकाराद्राजसोद्भूतिः षकारात्तामसोद्भवः ।
सकारात्सत्त्वसंभूतिरिति त्रिगुणसंभवः ॥२६॥

तत्रावस्थात्रयं निरूपयति सत्त्वमित्यादिना—पुरा सृष्टेः प्राक् शषसवर्णसंभूतान् सत्त्वरजस्तमोगुणानाश्रित्य परमशिवः सर्वभूतेषु क्रीडतीत्यर्थः ॥२५-२६॥

हल्

तत्त्वातीतः परः साक्षी सर्वानुग्रहविग्रहः ।
अहमात्मा परो हल् स्यामिति शंभुस्तिरोदधे ॥२७॥

॥ इति नंदिकेश्वरकारिका समाप्ता ॥

सर्वतत्त्वजनकः स्वयं तत्त्वातीत इति ज्ञापनार्थमेतत् सूत्रं चकारेत्याह तत्त्वातीत इति—सर्वानुग्रहविग्रहः साक्षी तत्त्वातीतो हल् स्यामिति ढक्कानिनादव्याजेन सर्वेषां मुनिजनानां तत्त्वमुपदिशन् तिरोदधे इत्यर्थः । "हकारः शिववर्णः स्यादिति शैवागमस्थितिः" इति शिवम् ॥२७॥

इति नंदिकेश्वरकारिकाया उपमन्युकृता
तत्त्वविमर्शिनीव्याख्या सम्पूर्णा.

ಗಂಜಿವಿಷ್ಣುಮೂ

ತಂದ ಭಟ್ಟ

2-4-1940